# मुषकवधः

इदानिं वयं सर्वदा श्रुण्मः यत् विश्वे यत्रतत्र युद्धानि भवति इति। कुत्र राष्ट्रानां सङ्घर्शः अस्ति, कुत्र तु एके एव राष्ट्रे जन समुदायाः युद्धं कुर्वन्ति, अन्ये च इण्टरनेट मध्ये अपि शब्दसाङ्ग्येषु निरताः सन्ति। अस्माकं गृहे अपि एतावत् महायुद्धं अनेकवारं वर्तते। तस्य वर्णणम् अत्र निवेदितम् अस्ति।

रविवासरः -- विरामस्य दिनः। भोजनं समाप्य सन्तुष्टाः वयं सर्वे सुखेन उपविष्टाः स्मः। मम पिता वृत्तपत्रिका पठन् अस्ति, अहं तु चित्रपट सङ्गीत श्रुण्वन् निद्रां कुर्वन् अस्मि। भगिन्याः पठनम् च अन्ये प्रकोष्ठे प्रचलन् अस्ति। वातावरणम् तु अतीव शान्तं, प्रसन्नं च अस्ति।

तदा एव मम भगिन्याः आक्रोशः श्रुतः। महाभारते शङ्खनादं कृत्वा युद्धं आरब्धम्, अस्माकं गृहे तु भगिन्याः उच्चैः आक्रन्दनं एव युद्धघोषः। सः धावन्ति बहि आगच्छति। मुषकाः अन्वेष्टुं तस्य विषेषप्राविण्यम् अस्ति इति अहं मन्ये। गुप्तहेरा इव मम भगिनी शत्रुपक्षस्य (मुषकस्य) वार्ता आनयति। प्रकोष्ठे मुषकः अस्ति एतत श्रुत्वा अस्माकं सैन्यं अनुक्षणं सज्जं भवति।

सर्वेषां कार्यं, शस्त्रं तु पुर्वनियुक्तम् अस्ति। मम पिता अस्माकं सेनापति, तस्य अस्त्रम् तु अतिशक्तिशालि -- सम्मार्जनी। अहं, मम अनुजः च सैनिकौ। अहं धावन् पादत्राणम् आनयामि, मम अनुजः तस्य शस्त्रम् -- काष्ठम् धारयति। अतः सज्जं भुत्वा एतत् सैन्यं प्रकोष्ठे प्रविशति। अहं द्वारं पिदधामि, आक्रमणं कर्तुम सिद्धः भवामि।

अहं हस्ताभ्यां पात्राणि इतस्ततः स्थापयन् पादत्राणेन तेषाम् उपरि प्रहाराः करोमि। एतेन भितः मुषकः द्वारं प्रति त्वरया धावति। तत्र मम अनुजः काष्ठेन तस्य प्रतिक्षां कुर्वन् अस्ति। काष्ठं भुमौ प्रहरन्तं मम अनुजं दृष्ट्वा, बहि गन्तुं अन्यः मार्गः नास्ति इति ज्ञात्वा मुषकः रणाङ्गणे मध्ये आगच्छति। तदा मम पिता तस्य अस्त्रस्य प्रयोगं कुशलतया करोति। सम्मर्जन्या शिघ्रमेव मुषकवधः भवति। परन्तु कदा कदा चतुरः मुषकः सम्मार्जनिप्रहारं अप्राप्य कस्यपि पादम् आरोहति। तदा कोष्ठे कथकलि, मणिपुरीतः भरतनाट्यंपर्यन्तं सर्वे नृत्यप्रकाराः दृश्यन्ते। अस्माकं एतावत् नृत्यकौशलम् अस्ति इति वयम् अपि न ज्ञातवन्तः इतःपर्यन्तम्।

महत् प्रयासेन मुषकवधः समाप्तं भवति। शिघ्रमेव विजयी सेना मृतं मुषकं धृत्वा बहिः प्रत्यगच्छति। यदा मम अनुजः मुषकं तस्य पुच्छेन धृत्वा गृहात् बहि क्षेप्तुम गच्छति, तदा भगिनीं पिडयितुं तस्या मुखसमिपे नयति। तदा पुनः एकवारं भगिनी उच्चैः आक्रोशति। एषः अस्माकं विजयनादः। युद्धं समाप्तं इति सङ्केतः।

परश्रमेण श्रान्ताः वयं सर्वे चायं पित्वा पुनः विरामदिनस्य आनन्दं अनुभवामः।